दिनाङ्क: - 16/12/2024 सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>मुख्यवार्ताः</u>

प्रधानमन्त्री नरेन्द्रमोदी श्रीलङ्कादेशीय: राष्ट्रपति: अनुराकुमार दिसानायके च  नवदिल्ल्यां सञ्जात-द्विपक्षीयवार्तानन्तरम् पारस्परिक-कल्याणानां प्रसङ्गै: सह द्विगुण-कराधान-राजकोषीय-चौरकार्ययो: शमनप्रक्रियानाम् विषये अपि चर्चां कृतवन्तौ।

राज्यसभायाम् अद्य भारतीयसंविधानस्य पञ्चसप्ततिवर्षाणां गौरववहायात्रायां एका विशिष्टचर्चा समारब्धा।

वित्तमन्त्री निर्मलासीतारामन इत्येषा उक्तवती यत् भारतनिर्माणाय प्रतिबद्धताया: पुन:पुष्टिकरणस्य काल: समागत:। कांग्रेसदलाध्यक्षश्च मल्लिकार्जुन खरगे: प्रशासने संविधानस्य निर्बलतायै आरोपं ख्यापितवान्।

अद्य विजयदिवसस्य अवसरे एक-सप्तत्यधिक-नवदश-शत-तमे वर्षे वीरगतिं प्राप्तवत: वीरसैनिकान् प्रति कृतज्ञराष्ट्रं श्रद्धाञ्जलिम् अर्पयति।

राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च तबलावादकस्य जाकिर हुसैनस्य देहावसाने शोकम् प्रकटितवन्तः।

भारत-ऑस्ट्रेलिया-देशयोर्मध्ये वर्षाबाधितायां स्पर्धायां तृतीय-दिवसीय-क्रीडान्तं यावत् चतुर्णां क्रीडकानां हानौ भारतीय-दलम् एकपञ्चाशत् धावनाङ्कान् विरचितवत्।

================================

राष्ट्रपति: श्रीलंकादेश:

भारत-श्रीलंकादेशाभ्यामद्य आतंकवादस्य शमनाय सहभागितापत्रेषु हस्ताक्षरं कृतम्। अपि च द्विगुण-कराधान-राजकोषीय-चौरकार्ययो: शमनप्रक्रियानाम् उपायेषु चर्चा जाता। उभौ देशौ

श्रीलंकादेशस्य प्रशासनिकसेवकानां प्रशिक्षण-क्षमता-निर्माणाय एकस्य सहभागिताज्ञापनपत्रस्य अपि आदानप्रदानं कृतवन्तौ। प्रधानमन्त्री नरेन्द्रमोदी श्रीलंकादेशीयः राष्ट्रपतिः अनुराकुमार दिसानायके इत्येषः च नवदिल्ल्यां सञ्जात-द्विपक्षीयवार्तानन्तरम् पारस्परिक-कल्याणानां प्रसङ्गेषु चर्चाः कृतवन्तौ। स्वीये वक्तव्ये प्रधानमन्त्री नरेन्द्रमोदी प्रसन्नताम् प्रकटयन् उक्तवान् यत् श्रीदिसानायके इत्येषः राष्ट्रपतित्वेन स्वीय विदेशयात्रायै भारतं प्रत्यागतवान् इति

असौ अग्रे कथितवान् यत् यात्रेयं द्वयोः देशयोः सम्बन्धेषु नवीनाम् ऊर्जां गतिं च जनयति इति। श्रीमोदिना अभिव्यक्तं यत् साम्प्रतं यावत् भारतेन श्रीलंकादेशाय-पञ्चार्बुदडॉलरमितस्य ऋणानुदानस्य साहाय्यम् प्रदत्तम्। अग्रे च भारत-श्रीलंकयोः जनानां मध्ये निहितः सम्बन्धः सभ्यताभिः सह संयुक्तोऽस्ति इति। श्रीमोदी न्यगादीत् यत् पालीभाषायाः शास्त्रीयभाषात्वेन अभिज्ञाने श्रीलंकायामपि जनैः प्रसन्नता अभिव्यक्ता इति।

अद्य प्रातःकाले राष्ट्रपतिभवनस्य परिसरे अतिथिगणमान्यस्य श्रीदिसानायके इत्येतस्य औपचारिकं स्वागतं समभवत्। तदनु श्रीदिसानायके इत्येषः राजघाटं प्रति गत्वा श्रीमते महात्मागान्धिने पुष्पाञ्जलिं समर्पितवान्। भारतस्य त्रिदिवसीय-यात्रायां समागतः एषः राष्ट्रपतिः रविवासरे नवदिल्लीं सम्प्राप्तवान्।

==================================

राज्यसभा

राज्यसभायाम् अद्य भारतस्य संविधानस्य पञ्चसप्ततिवर्षाणां गौरववहायात्रायां एका विशिष्टा चर्चा समारब्धा। अस्यां चर्चायां अभिव्यक्तेः स्वतन्त्रतायाः संविधानस्य च रक्षायाः विषये विपक्षदलाय प्रत्युत्तरम् प्रदातुं शासनरूढपक्षतः वित्तमन्त्री निर्मलासीतारामन इत्येषा उपस्थापितवती। अत्रावसरे असौ उक्तवती यत् भारतनिर्माणाय प्रतिबद्धतायाः पुष्टिकरणस्य च कालः समागतः। कांग्रेसदलाध्यक्षः मल्लिकार्जुन खरगेः च प्रशासने संविधानस्य निर्बलतायाः कृते आरोपं ख्यापितवान्।

==================================

लोकसभा-समाधान

केन्द्रप्रशासनेन अद्योक्तं यत् अस्मिन् वित्तवर्षावधौ प्रायश: श्रमविवादेन सह वृत्त्या सह सम्बद्धानि द्वादशसहस्राधिकानि प्रकरणानि समाधानाख्ये पटले पञ्जीकृतानि। लोकसभायां एकस्य प्रश्नस्य उत्तरे-श्रम-वृत्तिमन्त्रिणा मनसुखमाण्डविया इत्यनेन उक्तं यत् एतेषु सपादसप्तसहस्राधिकानां प्रकरणानां समाधानानि सन्ति विहितानि। केन्द्रीयमन्त्रिणा एतदपि उक्तं यत् आनुतोषिक-देय-अधिनियम अथ श्रमदेय-अधिनियमान्तर्गतश्च एकविंशतिसहस्राधिकानि प्रकरणानि पञ्जीकृतानि आसन्, अधिकारिभिश्च पादोननवसहस्राधिकानां प्रकरणानां समाधानं विहितमस्ति।

==================================

विजयदिवस:

राष्ट्रपतिः द्रौपदीमुर्मुः , उपराष्ट्रपतिः जगदीपधनखडः, प्रधानमन्त्री नरेन्द्रमोदी, रक्षामन्त्री राजनाथसिंहः च अद्य विजयदिवसस्य अवसरे एक -सप्तत्यधिक-नवदश-शत-तमे वर्षे वीरगतिं प्राप्तवत: हुतात्मनः वीरसैनिकान् प्रति श्रद्धाञ्जलिम् अर्पितवन्तः। एकस्मिन् सामाजिक-सन्देशपटले राष्ट्रपतिः मुर्मुः, वीरान् संस्मरन्ती उक्तवती यत् तेषां वीराणां कथाः प्रत्येकम् भारतीयं प्रेरयन्ति, राष्ट्रिय-गौरवस्य स्रोतत्वेन एव तिष्ठन्ति च । उपराष्ट्रपतिः जगदीपधनखडः अपि हुतिंगतेभ्यः वीरभटेभ्यः श्रद्धाञ्जलिम् अददात्, स: सैनिकानां वीरतायाः निःस्वार्थ-त्यागस्य च प्रशंसाम् अकरोत्। सामाजिकान्तर्जाल-पटले प्रधानमन्त्रिणा नरेन्द्रमोदिना वीरसैनिकानां साहसस्य त्यागस्य च सम्मानं कृत्वा, सैनिकानां निस्वार्थ-समर्पणम्, दृढसंकल्पः च राष्ट्रस्य रक्षणं, वैभवं च आनयताम् इति स: उक्तवान् । सैनिकानां त्यागः सर्वदा भावि वंशं प्रेरयिष्यति तथा च राष्ट्रस्य इतिहासे गभीरतया सन्निहितो भविष्यति इत्यपि श्रीमोदी उक्तवान्। एनं दिवसं स्मरन् रक्षामंत्री राजनाथसिंहः अपि नवदिल्ल्या: राष्ट्रिय-युद्धस्मारके पुष्पमालां अर्पितवान्। रक्षासचिवः सञ्जय् सेठ:, रक्षासचिवः जनरल् अनील् चौहान:, सेनाध्यक्षः जनरल् उपेन्द्र द्विवेदी, वायुसेनायाः प्रमुखः एयर्-चीफ् मार्शल् ए. पि. सिंहः रक्षासचिवः

राजेशकुमारसिंहः नौसेनायाः उप-प्रमुखः कृष्ण-स्वामिनाथन इत्येते पुष्पमालां अर्पणम् कुर्वन्तः हुतात्मभ्यः श्रद्धाञ्जलिम् प्रदत्तवन्त:।

==================================

राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री - देहावसाने

राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च तबलावादकस्य जाकिर हुसैनस्य देहावसाने शोकम् प्रकटितवन्तः। राष्ट्रपतिः द्रौपदीमुर्मु: सामाजिकसञ्जालीयपटले प्रोक्तवती यत् श्रीजाकिर-हुसैनः स्व- अद्वितीयसृजनशीलतायाः आविष्कारशीलतायाः च कृते प्रसिद्धः आसीत्, भारतपश्चिमदेशयोः मध्ये सङ्गीतपरम्पराणां मध्ये स: सेतुस्सदृश: आसीत्। तस्य मृत्यु: सङ्गीतजगते महती हानि: इति अवदत्। उपराष्ट्रपतिः जगदीपधनखड: अकथयत् यत् भारतीयशास्त्रीयसङ्गीतं वैश्विकमञ्चं प्रति नेतुम् एकः प्रसिद्धः तबला-वादकः जाकिरहुसैनः भारतस्य सांस्कृतिक-परिदृश्ये समृद्धं न्यासं नीतवान्। सामाजिकसन्देशपटले प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् जाकिरहुसैनः भारतीयशास्त्रीयसङ्गीतस्य जगति क्रान्तिम् आनीतवान्। प्रधानमन्त्रिणा उक्तं यत् सः तबलावाद्ययन्त्रं वैश्विकमञ्चे आनयत्, स्वस्य अप्रतिमतालेन कोटिशः जनान् आकृष्टवान् च। श्रीमोदी अवदत् यत् तस्य प्रतिष्ठितप्रदर्शनानि, आत्मानुभूतियुतानि सांगीतिक संरचनानि च सङ्गीतकाराणाम्, सङ्गीतप्रेमिणां च कृते प्रेरणां दास्यन्ति।

==================================

नेतन्याहू-ट्रम्पौ

इजरायलदेशस्य प्रधानमन्त्री बेंजामिन-नेतन्याहू: अमेरिकादेशस्य नवनिर्वाचित: राष्ट्रपति: डॉनाल्ड ट्रम्पश्च सीरियायां प्रचाल्यमानै: घटनाभिस्सह हमासेन बन्धीकृतजनविषयेषु चर्चां कृतवन्तौ। उभाभ्यां नेतृभ्यां गाजाक्षेत्रे हमासेन निगडितानाम् इजरायलदेशीयानां वैदेशिकानाञ्च जनानां मोचनमभिलक्ष्य सद्य: कृतप्रयासानामुपरि अपि चर्चायै दूरवाण्यां संवादो विहित:। नेतन्याहू इत्येनन उक्तं यत् यदा ट्रम्प: पदभारं ग्रहीष्यति, यदि जनवरीमासस्य विंशतिदिनांकं यावत् अस्य समाधानं न भविष्यति, तर्हि तस्मै विषयोऽयं समाह्वानत्वेन

स्थास्यति। नेतन्याहू इत्येनेन आम्रेडितं यत् सीरियाया: सैन्यस्थलेषु सद्य: एव विहितानि आक्रमणानि एतदर्थम् आसन् यत् भविष्यत्काले शस्त्रास्त्राणां प्रयोग: इजरायदेशं विरुध्य न भवेदिति। ट्रम्पस्य प्रवक्त्रा च दूरवाणीविषयिकया सूचनया अस्पष्टता नोद्घाटिता।

==================================

<u>क्रिकेट</u>

भारत-ऑस्ट्रेलिया-देशयोर्मध्ये प्रचाल्यामानायां बार्डर-गावस्कर क्रिकेटनिकषस्पर्धामालिकायां त्रिसु स्पर्धासु वर्षावाधितायां तृतीयायां स्पर्धायां दिवसीय-क्रीडान्तं यावत् चतुर्ण्णां क्रीडकानां हानौ भारतीय-दल एकपञ्चाशत् धावनाङ्कान् विरच्य क्रीडति। स्पर्धेयं ऑस्ट्रेलिया-देशस्य ब्रिस्बेननगरस्य गाब्बाक्रीडाङ्गणे क्रीड्यते।

।।इति वार्ता:।।